CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ हलषष्ठीव्रतकथाप्रारंभः॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीगणेशायनमः॥ अद्येहेत्यादिममैतज्जन्मसकृत्पापक्षयदौर्भाग्यक्षयानेक
गुणान्वितसुतौपतिसहचिरजीविवतद्वरपतिसहदिव्यकोटिवर
षांछिन्नविष्णुपुरनिवासकामाकुशपलाशव्रतनिमित्तमेभिः उपचारैः शं
भुषण्मुखपार्वतीगणेशानांपूजनमहंकरिष्ये॥ ततः प्रतिष्ठाआवाहनं॥
अर्घ्यादिदानंअर्चदिकमुत्सृजेत्॥ ततः कथाश्रवणं॥ ततोदक्षिणादानं
विसर्जनं॥ ॥ युधिष्ठिरउवाच॥ भगवन्देवकीसूनोलोकानुग्रहकारक॥ का

जातोसिमूलतोदेवतस्मान्मेनुग्रहंप्रति॥ १॥ अभिमन्योहतेबालेसुत्र
द्रात्यंतदुःखिता॥ जीवितुंनातिशक्नोतिदुःखेनपरिपीडिता॥ २॥ तथैय
रुदंतीनिसंद्रौपदीयोषितांवरा॥ तिष्ठत्यहर्निशंदेवषंचपुत्रैर्विनाहृ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ता॥३॥ अस्मिन्नोश्वपत्न्यांयोगर्भोस्तिपुरुषोत्तम॥तस्मिन्नमामिसंतानेसोपिदग्धोद्यतेजसा॥४॥ अथवाम्नापिरुष्टेनभर्शनिश्चलतांगतः महादुःखमिमंघोरंसंसारेप्यशोकजं॥५॥पित्रोःसुखकरंजन्मपुत्राणांविरजीवितं॥यथादीर्घायुरारोग्यंसंततिःस्यादनुत्तमा॥६॥तदर्थंकथयतेदेवकीदानंव्रतमेवकिं॥श्रीकृष्णोवाच॥व्रतंकुशपलाशाख्यंत्रिषु लोकेषुविश्रुतं॥७॥पुराकृष्णासुभद्राभ्यांनरकंराज्यदर्पितः॥तेनैतेऽपस्यदोषेणभ्रंशंपीडितमानसं॥८॥उत्तराव्रतमेतत्तुकरोतुकुलवर्द्धनं॥मृतोपिलभतेगर्भोजीवितंनात्रसंशयः॥९॥युधिष्ठिरउवाच॥कोविधिर्देवताकावाकस्मिन्कालेविधीयते॥कथंवाख्यातिमायातंकेन

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चीर्णं व्रतं त्वि दं ॥ १० ॥ सूत उवाच ॥ सुहोत्रो नाम राजाभूत्सुपर्णा तस्यच
भ्रिया ॥ तस्यांसंजनयामास पुत्रंहस्तीति विश्रुतं ॥ ११ ॥ स्व [illegible] नाम्नानि
र्ममेयोसौ पुरावैहस्तिनापुरं ॥ सबालएवत्रयोगाँधात्रीवसहायवा
न् ॥ १२ ॥ जलक्रीडार्थमौत्सुक्या द्बालस्याम्बुमाविशत् ॥ ततोगृहीत्वा
तंबालंयाहोनिजबिलंगत ॥ १३ ॥ तच्छ्रुत्वाक्रोधवेगेनपुत्रदुःखेनपी
डिता ॥ धात्रीसुतंसुपर्णापि प्रज्वलद्भ्यांवाहने ॥ १४ ॥ आरुह्यविक्षेप
शोचंतीसुपुत्रंरुदितीस्वयं ॥ राजापिदुःखसंविघ्नः चैतन्यरहितोभव
त् ॥ १५ ॥ धात्रीदुःखवेगाच्चजगामहनंवनं ॥ वनेकुशपलाशाद्या ॥ २ ॥
मधोलहितमूर्तयः ॥ १६ ॥ शंभुषण्मुखपार्वत्योविघ्नराजेनसंयुता

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिष्ठंतिशीर्णपर्णेषुसर्वजंतुविवर्जिता ॥ १७ ॥ धात्र्याचलक्षितादेवा:
पूजिताश्चद्विजैर्नृप ॥ तृणधान्यमधूकाभ्यांआहारंसाकरोतिच १८
एवंतस्यास्थितायोचनगरेऽद्भुतदर्शने ॥ वैशाखभाद्रमासस्यकृष्णषष्ठी
युधिष्ठिर ॥ १९ ॥ निर्गतोश्वाष्टमध्यात्र्यांपुत्रोतिसुंदर: ॥ भरद्वंपूर्वमेत
द्विराजाराज्ञीजनै:सह ॥ २० ॥ चिंतयाकुलितैर्दृष्ट्वाधात्रीपुत्रस्यजीवितं ॥ प
प्रच्छतु:कारणंतद्वाह्मणान्ज्ञानिन:शुचीन् ॥ २१ ॥ अत्रांतरेशिवस्थाना
द्दुर्वासामुनिसत्तम: ॥ आजगामसहाभागरूपंबोधयितुंहितं ॥ २२ ॥ मनोर
थंज्ञात्वाद्दुर्वासामुनिसत्तम: ॥ अर्घ्येणपूजयामासस्वागतेनचभूपति:
॥ २३ ॥ तमेवार्थंतुपप्रच्छनमस्कृत्यपुन:पुन: ॥ दुर्वासाउवाच ॥ राजंस्त्वकु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मारस्य धात्री चमनस्विनी॥ २४॥ तया संपूजितः शंभुः पार्वत्या षण्मुखेन च॥ गणेशेनापि नापुतः श्चैवलस्यैतत्क्षमीदृशं॥ २५॥ अथैवत्रागं तव्यं युवाभ्यामपि भूपते॥ तेमहिष्यपि गृह्णाव्रतमेतन्महाफलं॥ २६॥ आश्वास्यतांतथाधात्रीसर्वसंपत्स्यतेहितं॥ वत्सकाशंमहाराजशंभुनाप्रेषितोत्यहं॥ २७॥ श्रुत्वाराजाचसक्षीचजग्मतुस्वद्मनेशुभं॥ धात्रीपुत्रेणसहितोदुर्वासादिजनैःसह॥ २८॥ तत्रधात्रीपूजयित्वाकुशब्रह्मातरोरधः॥ अथापरमयायुक्तादेवमूर्तिंचतुष्टयं॥ २९॥ राजाधात्रीसमास्यैश्चोपुत्रेणसमतोषयत्॥ धात्रीहर्षेणसंयुक्तावृत्तंसर्वंराजेस्तवमयादत्रयतः॥ ३॥ प्रभृतिआगतं॥ पूजयाप्रिशिवंदेव्यास्वसुतंवान्यमाजनं॥ ३०॥ अ

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

र्धरात्रौमयादृष्टंसुस्वप्नंहर्षपूरितं॥शंकरेवृषमारूढोगौरीपुत्रद्वयांश्चि
ता॥३१॥[illegible]उक्तवान्यद्वचो
भूयः तंशृणुष्वमयादरात्॥यस्मात्वयापूजितोहंगौरीपुत्रद्वयांचिता॥३२॥
पलाशकुशयोरध्यस्तस्माज्जीवतुमेसुतः॥मत्प्रेरितश्चदुर्वासागमिष्यत्य
द्यभूपतिं॥३४॥पत्न्यासमानेतंतवपुत्रेणजीवता॥राज्ञींचैतद्व्रतवरं
शेतुविधिपूर्वकं॥३५॥सातुजीवितपुत्राहिबहुपुत्राभविष्यति॥व्रतस्या
स्यविधानंचदुर्वासाःकथयिष्यति॥३६॥साधाऋौदितमाकर्ण्यस्वप्नवृत्त
मशेषतः॥राजाराज्ञीतदाश्चर्यमूचतुर्व्रतमुत्तमं॥३७॥दुर्वाससोमुखंवी
क्ष्यतस्थौसंबभूवतुः॥ततःक्षीरमुखःसाक्षाद्भोमूर्तिहिमानुषी॥३८॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुर्वासाः कथयामास व्रतराजविधिं ततः॥ दुर्वासाउवाच॥ अस्य भांद्रस्य
॥४॥ मासस्य कृष्णषष्ठीशुभप्रदा॥३९॥ अस्यां दिग्प्रतिवर्षं तु प्रातःस्नात्वासुसं
यता॥ व्रतस्यनियमेतिष्ठे क्रोधलोभविवर्जिता॥४०॥ पतितोत्यजसंभाषद
र्शनानिच॥ नहिसंजीवितंशेषनखच्छेदनपद्धतिं॥४१॥ सखीभिःसह
मध्याह्नेयन्यौडुपवनौलिकं॥ पलाशकुशयोश्चाधः कृत्वामूर्तिंसुशम
यीं॥४२॥ शिवंस्कंदंविघ्ननाथंमंत्रैरेवप्रपूजयेत्॥ पुष्पैर्नानाविधैरेवफ
लोद्भूतैर्मनोरमैः॥४३॥ नमःशिवायसोमायपंचवक्त्रायशूलिने॥ दि
ग्मिहाकालगणयुक्तायशंभवे॥४४॥ शिवायैहरकांतायैप्रकृत्यैसृष्टि ॥४॥
हेतवे॥ सुतंसौभाग्यदायिन्यैगौर्यैदिव्यैनमोनमः॥४५॥ आयुर्वाहगण

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2

शायपरश्वधधरायचसृणिहस्तायवीरायनमः पाशासिपाशाये॥४६॥
हरगौरीसुपुत्रायकृत्तिकातनयायच॥स्कंदायशिखिवाहायज्ञानश
क्तिधरायच॥४७॥दीपचंदनधूपैश्चनैवेद्यैर्विविधैस्तथा॥संपूज्यगरु
डंगछेत्संतर्प्यद्विजपुंगवान्॥४८॥तूर्णंधान्यौत्तमश्रीमन्मधूककुसुमं
तथा॥महिषीदधिदुग्धंचघृतंशस्तंविशेषतः॥४९॥अफालकृष्ण
स्यसंलग्नेदेवंविधंहियत्॥विधिरेषव्रतस्यास्यतवराज्ञीकरोतुच॥५०॥
अथुनानभतेसोथंपुत्रपौत्रसमन्विता॥दुर्वाससोवचःश्रुत्वाराज्ञीच
क्रेचतद्व्रतं॥५१॥निःसृतोराजपुत्रोथविलाद्वाहस्यसत्वरं॥ववंदेचर
णे॥तुःपितुर्दुर्वाससस्तदा॥५२॥अपरेबहवःपुत्राराजाराज्ञीचतत्फला

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तु॥ दीर्घायुषोमहावीर्याधनसत्त्वगुणान्वितः॥ ५३॥ ईतयःप्रशमंयांति
॥५॥ शमीदुर्भिक्षमेवच॥ चक्रेराज्यंचनिर्विघ्नंराजावर्षगणान्बहून्॥५४॥ एतद्व
तक्रोत्येषाउत्तराबरवर्णिनी॥ अश्वत्थाम्नाहतोहतोगर्भोजीवितंलभतां
चिरं॥५५॥ व्रतस्यास्यप्रभावेनस्थिराभवतुमेमतिः॥ केशवस्यवचश्रुत्वा
धर्मपुत्रोयुधिष्ठिरः॥ ५६॥ उत्तरांकारयामासव्रतंविधिवदीश्वरः॥ अश्व
त्थाम्नाहतंजीवंतंगर्भंचोत्तरादधे॥ ५७॥ क्षणंजीवमासाद्यप्रसूहं
समहोत्सवं॥ जन्मेजयस्यपितापरीक्षितिविधीयते॥ ५८॥ एवंविधिं
यःकुरुतेनरस्त्रीव्रतंवरेण्यसुतपौत्रवृद्धिंसप्राप्यपत्यासहचायुषां ॥५॥
तेप्रयातिलोकंशशिशेखरस्य॥ ६०॥ इतिश्रीमहाभारतेनिखिलम

पुत्राश्चैवापतेज्ञातायज्ञःसत्त्वगुणान्वितः

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति सकलसारे भविष्योत्तरपुराणे कुशपलाशाख्यव्रतकथासमाप्ता
ग्रं ३१ प ४ सं १८५८ ति माघशु ५ दृ पुस्तकं कुंटेश्वरनामकविनायकभट्टस्य ॥

पूज्यौचकुशपलाशौवर्द्धतेतौयथाविधि ॥ तथामेभर्तृपुत्रादीन्नवर्द्धयतंप्रसादतः पूजामंत्रः ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ इत्यथर्षिरचितं कथापञ्चकं ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi